दिनाङ्क :- 19.07.2025

प्रात: - 06:55

प्रधानमन्त्री-बिहार-पश्चिमबंगालः

प्रधानमन्त्रिणा नरेन्द्रमोदिना गतदिने बिहार पश्चिमबङ्गालयोःषड्शताधिक-द्वादशसहस्त्रकोटिरुप्यकाणां नानाविधाः विकासपरियोजनाः शुभारम्भिताः।

बिहारस्य मोतिहारीनगरे एका विशालजनसभा सम्बोधयता प्रधानमन्त्रिणा उद्घोषितं यत् तस्य सर्वकारः देशस्य पश्चिमभागानां विकासानुसारं पूर्वक्षेत्राणां विकासकार्ये प्रयत्नरतोऽस्ति।

तेन स्पष्टीकृतं यत् पूर्वीभारतस्य विकासेन विना, भारतदेशः विकसितदेशः नैव भवितुमर्हति।

श्रीमोदिना प्रोक्तं केन्द्र-राज्यसर्वकारौ मिलित्वा बिहारस्य विकासाय प्रयत्नशीलौ स्तः।

प्रधानमन्त्रिणा द्विशताधिक-सप्तसहस्त्र- कोटिरूप्यकाणां विविधविकासपरियोजनानां शिलान्यासं उद्घाटनञ्च राष्ट्राय समर्पितम्।

अनन्तरं पश्चिमबङ्गालस्य दुर्गापुरे प्रधानमन्त्रिणा चतुश्शताधिक-पञ्चसहस्त्र-कोटिरूप्यकाणां नानापरियोजनानां शिलान्यासं उद्घाटञ्च कृतम् ।

तत्रैव जनसमूहं सम्बोधयन् सः प्रोक्तवान् यत् एताः परियोजनाः क्षेत्रस्य सञ्चार-सम्पर्कं द्रुतगत्या वर्धयिष्यन्ति।

राष्ट्रपतिः-चलचित्रम्

राष्ट्रपतिः द्रौपदीमुर्मूः महोदयाया: गतदिने राष्ट्रपतिभवनस्य सांस्कृतिककेन्द्रे 'श्रीजगन्नाथ नका नवकलेवर' चलचित्रं दृष्टवती।

एतत् भक्तिपरायणं ऐतिहासिकञ्च चलचित्रम्, महाप्रभोः श्रीजगन्नाथस्य पवित्रस्य नवकलेवरानुष्ठानस्य उत्पत्तिं आधारिकृत्य निर्मितम्।

एतस्य चलचित्रस्य निर्देशिका सौभाग्यलक्ष्मी जेना, कलाकारदलेन सह अवसरेऽस्मिन् उपस्थितासीत्।

रिजिजू-न्यायमूर्तिवर्म्मा

संसदीयकार्यमन्त्री किरेणरिजिजूः प्रोक्तवान् यत् न्यायमूर्तेः यशवन्तवर्मणः महाभियोगविषये सर्वाणि राजनैतिकदलानि एकमतानि सन्ति।

न्यायमूर्तेः वर्मणः नवदिल्लीस्थे निवासे महान् धनराशिः सम्प्राप्तः । श्रीरिजिजूः समाचारसंस्थायै प्रदत्तसाक्षात्कारे एतदुक्तवान् । तेनोक्तं यत् एतत् प्रकरणमवलम्ब्य विविधराजनैतिकदलानां वरिष्ठनेतृभिः सहापि चर्चा समभवत्। मन्त्रिणा प्रोक्तं यत् एतदर्थं एकलसांसदैः सहापि सम्पर्कः करिष्यते।

अत्रान्तरे उच्चन्यायालयस्य वर्तमानन्यायाधीशेन यशवन्तवर्मणा धनराशिप्रकरणमुद्दिश्य त्रिसदस्यानां आन्तरिकसमित्याः कृते महाभियोगं विरुध्य सर्वोच्चन्यायालये याचिका प्रदत्ता।

सर्वोच्चन्यायालये प्रदत्तयाचिकायां भारतस्य तदानीन्तनमुख्यन्यायाधीशेन संजीवखन्ना इत्यनेन, राष्ट्रपतये प्रधानमन्त्रिणे च न्यायमूर्तेः वर्मणः कार्याचरणपत्रस्य निराकरणं याचितम् ।

महा-आईआईसीटी

केन्द्रीयसूचना-प्रसारणमन्त्रिणा अश्विनीवैष्णवेन महाराष्ट्रस्य मुख्यमन्त्रिणा देवेन्द्रफडणवीसेन च गतदिने मुम्बईनगरस्थे एनएफडीसी-सङ्कुले भारतीय-रचनात्मक-प्रौद्योगिकीसंस्थानस्य प्रथमपरिसरस्य संयुक्तरूपेण उद्घाटनं कृतम्।

श्रीवैष्णवेन उद्घोषितं यत् संस्थानमिदं गूगल्-मेटा-माइक्रोसॉफ्ट्-एप्पल्सदृशैः प्रौद्योगिकीमहासंस्थाभिः सह कार्यं कृत्वा वीएफएक्स-पोस्ट-प्रोडक्शन-एक्सआर- क्रीडा-एनीमेशन-सदृशेषु क्षेत्रेषु उद्योगोन्मुखं प्रशिक्षणं प्रदास्यति।

भारतीय-ऋतुविज्ञानविभागः-

भारतीय-ऋतुविज्ञानविभागेन केरले अतिवृष्टिमालक्ष्य रेड-अलर्ट इति रक्तसञ्चेतना प्रसारिता। ऋतुविभागेन अद्य राजस्थान-पश्चिमीमध्यप्रदेश-

असम-तमिलनाडु-दक्षिणकर्नाटकेषु आरेंज-अलर्ट इति सञ्चेतना प्रसारिता ।

विभागेन आगामिदिनद्वयेभ्यः मध्यप्रदेशराजस्थानयोः अतिवृष्टेः अनुमानं प्रख्यापितम्। देशस्य दक्षिणभागेष्वपि एतादृशी एव स्थितिः भविष्यति।

चतुरङ्ग-महिलाविश्वचषकः-

फिडे-महिला-चैस्स-विश्वचषकस्पर्धायां ग्रैंडमास्टर-कोनेरू-हम्पी, डी-हरिका, आर. वैशाली,अन्ताराष्ट्रीय मास्टर दिव्या-देशमुख इत्येते प्रागुपान्त्यचक्रे प्रविष्टवन्तः। अनेनैव सह भारतेन चतुर्भिः क्रीडकैः सह स्पर्धायाः प्रागुपान्त्यचक्रे प्रविश्य कीर्तिलेखः रचितः।